# शब्दविमर्शः - खच्प्रत्ययान्तशब्दानामवलोकनम्।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## वाचंयमः।

वाचंयमो नाम मौनव्रती। अथ मौनमभाषणमित्यमरः। मुनेः कर्म भावो वा मौनम्। दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते (भगवद्गीता.2.57) इति गीताकारोक्त्या स्थिरचित्ते वीतरागादौ मन्वत्रिविष्णुहारीतादिषु मुनिशब्दः प्रयुज्यते। तद्वदाचारो मौनम्। शास्त्रविहितः सङ्कल्पविशेषो व्रतम्। मौनं व्रतमस्येत्यर्थः। 'वाचि यमो व्रते' (3.2.40) इति सूत्रेण वाक्छब्दे कर्मण्युपपदे 'यम उपरमे' (भ्वा.984) इत्यस्माद्धातोः खच्प्रत्ययो विधीयते व्रते गम्यमाने। वाचं यच्छति नियमयतीति वाचंयमो मौनव्रती। वाचो नियमनमपि तप इति गीताकारो वदति - अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्। स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।। इति (भगवद्गीता.17.15)।

भट्टिकाव्ये वनवासिनां रामादीनां भारद्वाजदर्शनवर्णनाप्रसङ्गादुद्धृतमुदाहरणमवलोकयन्तु। वाचंयमान् स्थण्डिलशायिनश्च युयुक्षमाणाननिशं मुमुक्षून्। अध्यापयन्तं विनयात्प्रणेमुः पद्गा भरद्वाजमुनिं सशिष्यम्।। इति (भट्टिकाव्यम् 3.41)। ते पदातयो रामादयः शिष्यैः सह वर्तमानं वाचंयमान् = मौनव्रतान् भूशायिनो योगाभ्यासनिष्ठान् मोक्षाभिलाषिणः पाठयन्तं भरद्वाजमुनिं विनयेन प्रणमन्ति स्मेति भावः। 'वाचंयमपुरन्दरौ च' (6.3.69) इति निपातनात् पूर्वपदस्य अमन्तता।

कश्चन सन्देहः, मुमुक्षूणां मौनव्रतपालने किं प्रयोजनम् ? श्रूयताम्। लोकव्यवहारे शब्दमविषयीकृत्य ज्ञानमेव नास्तीत्यभिप्रैति, 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।' इति वाक्यपदीयकारः (ब्रह्मकाण्डम्.124)। तथा घटपटादिव्यक्तीनां व्यवहारविषयतायाः ज्ञापकं शब्दा भवन्तीत्यभिप्रैति 'अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनमिति (ब्रह्मकाण्डम्.13)। अर्थगतजातिः = घटत्वपटत्वादयः वाच्या, शब्दगतजातिः = घटशब्दत्वपटशब्दत्वादयः वाचिका। तथा च शब्दज्ञानाधीनम् अर्थज्ञानम्। अतः शब्दानां प्राधान्यम् इत्यभिप्रेत्याह 'यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः' इति (ब्रह्मकाण्डम्.15)। एवं वाच्यवाचकभावापन्नस्य नामरूपात्मकस्य निखिलप्रपञ्चस्य जन्मादिनियामिका मात्रारूपा विवर्तशक्तिः सूक्ष्मवागात्मकेषु अधिष्ठिता इत्यभिप्रैति 'शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धिनी' इति (ब्रह्मकाण्डम्.119)। तदुपष्टम्भकरूपेण संसारः शब्दादेव जात इति वेदज्ञाः जानन्ति इत्याह 'शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः' इति (ब्रह्मकाण्डम्.121)। इदं कर्तव्यमिति नियोगादिसकलव्यवहाराः शब्दनिबन्धनाः इत्यभिप्रेत्याह 'इतिकर्तव्यता लोके सर्वा शब्दव्यपाश्रया' इति (ब्रह्मकाण्डम्.122)।

अर्थाद् करचरणादिभिः बाह्यकरणैरनुष्ठितस्य तथा चक्षुरादिभिरिन्द्रियैः श्रुतस्य दृष्टस्य स्पृष्टस्य आघ्रातस्य रसितस्य वा खल्वभिव्यक्तिः वाचा क्रियते। वाचि निरुद्धे इन्द्रियार्थसन्निकर्षे सत्यप्यभिव्यक्तौ कार्याभावात्क्रमेण ततो बाह्यव्यापारान्निवृत्तः पुरुषः भूयसा एकाग्रतया आत्मसाक्षात्काराय यतते। अतो वाग्व्यापारस्येव तन्निरोधस्यापि महत्प्रयोजनं वर्तते।

तदास्ताम्। वाचंयमशब्दस्य प्रयोगमन्यत्र दृश्यताम्। भट्टिकाव्ये रामलक्ष्मणयोः हनूमता सङ्गमो वर्ण्यते। तत्र सुग्रीवसख्यं लाभायेति हनूमान् वदति। वाचंयमोऽहमनृते सत्यमेतद् ब्रवीमि ते। एहि सर्वंसहं मित्रं सुग्रीवं कुरु वानरम्।। इति (भट्टिकाव्यम् 6.102)।

वालिसुग्रीवयोः वैरानुकथनं यन्मयात्र विवृतं तत्सर्वं सत्यम्। अतः सर्वंसहं सुग्रीवं वानरं मित्रं कुरु इति भावः। प्राग्वत् 'वाचंयमपुरन्दरौ च' (6.3.69) इत्यमन्तत्वं निपात्यते। कोऽयं सर्वंसहशब्दो मध्ये श्रुतः खच्प्रत्ययान्तवद्भाति। सत्यं, तद्विषये अग्रे विशदं वक्ष्यामः।

रघुवंशे सुतीक्ष्णमुनेः तपस्तप्यतो वर्णनाप्रसङ्गे। वाचंयमत्वात्प्रणतिं ममैष कम्पेन किञ्चित्प्रतिगृह्य मूर्ध्नः। दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि सन्निधत्ते।। इति (रघुवंशम् 13.44)। एषः सुतीक्ष्णः वाचंयमो = मौनव्रती। मम प्रणतिं किञ्चिन्मूर्ध्नः कम्पेन प्रतिगृह्य विमानेन यद् व्यवधानं = तिरोधानं तस्मान्मुक्तां दृष्टिं पुनः सहस्रार्चिषि = सूर्ये सन्निधत्ते = सम्यङ्निधत्त इत्यर्थः।

खच्प्रत्ययान्तशब्दाः कतिचन विद्यन्ते। कतिपयैरुदाहरणैः तेषां स्वरूपं तत्प्रयोगञ्चावगन्तुं शक्ष्यामः। अतस्तेषां प्रत्येकेषां विषये ईषदीषत्प्रस्तूयाग्रे सरामः।